**अन्वेषिन्** (anv-eṣin) *adj.* **1A** who wishes or desires सदा हि दर्शनाकाङ्क्षी श्रेयोऽन्वेषी च वो हरि: MahāBhā. iii.18..4; **1B** who seeks (बिभीषण:) शिरसा चरणान्वेषी चतुर्भि: सह राक्षसै:। तं च राम: समुत्थाप्य ...। उवाच Rāmā. v.91.20 (GoRR.); स तु रामस्य धर्मात्मा निपपात विभीषण:। पादयो: शरणान्वेषी Rāmā. vi.13.2; स्त्रीमुद्रां झषकेतनस्य जयनीं सर्वार्थसंपत्करीं ये मूढा: प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिण: ŚatTrayī. 113; ओंकार रथमारुह्य विष्णुं कृत्वाथ सारथिम्। ब्रह्मलोकपदान्वेषी रुद्राराधनतत्पर: AmṛNāU. 2; कुसृत्या विभवान्वेषी TrikāŚe. iii.1.9; AbhidhāCin. 475; **2** who searches, looks for or finds out तौ सीतान्वेषिणौ गृध्रं लूनपक्षमपश्यताम् RaghuVa. 12.54; कथं मदन्वेषिण: सैनिकास्तपोवनमभिरुन्धन्ति Śāk. 7.12 (6) (Kale Ed.); कुमुदविटपान्वेषी हंसो निशास्वविचक्षण:। न दशति ... दिवापि सितोत्पलम् Hitopa. 4.106; मग्नं पाथसि पश्चिमस्य जलधेर्मार्तण्डबिम्बं ततो ध्वान्तैर्भूतगणैरगाहि भुवनं मन्ये तदन्वेषिभि: VasaTi. 46.2; **3** who sees, who looks into बुध: ...। किलान्वेषी वने त्वस्मिन्नाजुहाव स तामिलाम् PadmP. v.8.96.

**अन्वेषिष्यत्** (anv-eṣiṣyát) *adj.* who is going to search एषु देवा अन्वेषिष्यन्त: पुरस्ताद्वीर्यमदधुस्तथैवैष्वयमेतदन्वेषिष्यन् पुरस्ताद्वीर्यं दधाति ŚatBr. VI.ii.2.1.

**अन्वेष्टव्य** (anv-eṣṭavya) *adj.* [*f.* –ā] **1A** to be sought, i.e. to be aimed at **B** to be sought **C** to be desired, i.e. to be needed **2** to be searched, to be looked for, to be found out **3A** to be followed, i.e. to be resorted to **B** to be pursued **4** to be obtained **5A** to be asked, inquired **B** to be examined or investigated **6** to be known or realised **7** word or expression *anveṣṭavya* **1A** to be sought, i.e. to be aimed at अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम् ChāndoU. viii.1.1; viii.1.2; य आत्मापहतपाप्मा विजर: ... सोऽन्वेष्टव्य: स विजिज्ञासितव्य: ChāndoU. viii.7.1; viii.7.3; MaiU. 6.8; MaitrīU. 403.21 (6); TantrVā. 240.20 (*on* i.3.25); देहादिभूतस्यात्मनोऽपि आत्मा अनन्विष्ट: अन्वेष्टव्योऽलब्धो लब्धव्य: ... इत्यादिभेदव्यपदेश उपपद्यते BrahmSūBh. (Śaṅ.) 56.12 (*on* i.1.17); 168.18 (*on* i.3.14); सोऽन्वेष्टव्य: शास्त्राचार्योपदेशैर्ज्ञातव्य: स विशेषेण ज्ञातुमेष्टव्य: ChāndoUBh. 507.4 (*on* viii.7.1); आत्मतत्त्वम् ... अन्वेष्टव्यम् BṛĀraUBh. 215.4 (*on* ii.1.0); अन्वेष्टव्यं हि तद्ब्रह्म जन्मबन्धनिवृत्तये KūrmaP. 142.3 (1.12); न च प्रमातुरात्मनोऽन्वेष्टव्य आत्माऽन्य इत्याह Bhām. 119.1 (*on* i.1.4); किं दहराकाशादन्यदेव किंचिदन्वेष्टव्यं विजिज्ञासितव्यं च Bhām. 208.1 (*on* i.3.14); अन्वेष्टव्यं प्रयत्नेन तत्त्वज्ञैर्ज्योतिरान्तरम् KaviKanṭhā. 5.1 (30); SuvṛTi. 3.16 (9); MuktiU. 2.6; स शिव: सच्चिदानन्द: सोऽन्वेष्टव्यो मुमुक्षुभि: PañcaBṛU. 35; अश्रुतोऽहमदृष्टोऽहमन्वेष्टव्योऽमरोऽस्म्यहम् BrahmViU. 85; तस्मिन्यदन्तस्तदन्वेष्टव्यम् BrahmSūBh. (Rā.) 297.2 (*on* i.3.13); TattvPrakā. 47A.7 (*on* i.3.14); दहराकाशस्तदन्तर्वर्ति च यत् तदुभयमन्वेष्टव्यम् VedāntSā. (Rā.) 92.8 (*on* i.3.13); VedārthSaṁ. 137.13; बिम्बस्थानीयं ब्रह्म स्वरूपभूतमप्यन्वेष्टव्यम् PrakaVi. 112.23; अन्वेष्टव्य: परमात्मान्वेष्टु: ... न भिन्न: VedāntKa. 95.80 (*on* i.1.4); तस्मिन् यदन्तरित्यत्र हृत्पद्मस्थाकाशगतं ब्रह्मान्वेष्टव्यम् TattvPrakā. 48B.13 (*on* i.3.17); VedāntKau. 89.7 (*on* i.3.14); किं जीवोऽन्वेष्टव्यो ब्रह्म वेति जीवब्रह्मवादो निर्णीयते AṇuBh. 79.25 (*on* i.3.14); दहराकाशस्तदन्तर्वर्ति यत्पदोक्तं चेत्युभयं तत्पदपरामृष्टमन्वेष्टव्यम् ŚivārkaMaDī. i.440.11 (*on* i.3.16); **1B** to be sought त्वया ...। अन्वेष्टव्या हि वैदेह्या रक्षणार्थे सहायता Rāmā. ii.41.7; अबाधा द्विजमुख्यानामन्वेष्टव्या सदैव MārkP. 22.2; कश्चित्क्वापि स्थित: शेष: सोऽन्वेष्टव्य: प्रयत्नत: TantrVā. 435.4 (*on* ii.1.48); (यागानुष्ठानम्) तच्च ... पुरुषधर्म इति न प्रयोजनमन्वेष्टव्यम् AitUBh. 244.12 (*on* 1.0); कर्मान्तरत्वे त्वावृत्ति: स्यादिति कर्तव्यता वान्यान्वेष्टव्या BrahmSūBh. (Bhā.) 212.18 (*on* iii.4.34); 'अस्मिन् कामा: समाहिता:' इत्याकाशान्तर्वर्तिनोऽन्वेष्टव्या: कामा: VedāntDī. 49.6 (*on* i.13); भगवत्संदर्शनार्थं हि सर्वमुपासनाद्यन्वेष्टव्यम् TattvPrakā. 202A.10 (*on* iv.1.7); 58A.5 (*on* i.3.34); छलजातिनिग्रहस्थानलक्षणानि च वादिविनोदेऽन्वेष्टव्यानि Upask. 397.9 (*on* ix.2.2) नृसिंहौ। अन्वेष्टव्यौ योगिनामप्यनन्तावक्षणा ध्येयौ Rāgh. 10.48; अत एव संज्ञायुक्तग्रहणेष्वपि देवताङ्कत्वबोधको विधिरन्वेष्टव्य: MīmāKau. iii (2). 229.14 (*on* ii.2.19); **1C** to be desired, i.e. to be needed अद्यास्म्यहमन्धो योऽहमन्वेष्टव्ये काले पुत्रं न पश्यामि ŪruBha. 1.38 (3); **2** to be searched, to be looked for, to be found out सम्यक्तज्ज्ञै: ...। अन्वेष्टव्याश्च निपुणं पाण्डवा: MahāBhā. iv.25.11; अन्वेष्टव्या: सुपुरुषा: MahāBhā. xii.118.24; अन्वेष्टव्यै: कनकसिकतामुष्टिनिक्षेपगूढै: संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्या: MeghDū. *7 (Add. after 66); (कान्ताम्) अन्वेष्टव्यामवनिशयने संनिकीर्णैकपार्श्वां तत्पर्यङ्क(न्त)प्रगलितलवैश्छिन्नहारैरिवास्त्रै: MeghDū. *12 (Add after 89); चरैश्चरास्तथा शत्रोरन्वेष्टव्या: प्रयत्नत: MārkP. 27.7; अयि किमन्वेष्टव्यम् UttaRāC. 1.36(3); 2.13; 'अस्य गोर्द्वितीयोऽन्वेष्टव्य:' BrahmSūBh. (Śaṅ.) 108.14 (*on* i.2.11); BrahmSūBh. (Bhā.) 41.8 (*on* i.2.11); TattvPrakā. 33B.12 (*on* i.2.12); न च सत्ता सद्भ्यो निष्कृष्य केनचिदिन्द्रियेण विषयीक्रियते तस्मात् सत्तैवासिद्धान्तविषय इति प्रतिप्रलपतामौषधमन्वेष्टव्यम् BrahmSūBh. (Bhā.) 99.3 (*on* ii.1.14); किं त्वभिज्ञानशून्यस्ते सोऽन्वेष्टव्य: प्रिय: कथम् KathāSaSāg. vi.5.17; न चात्र कल्पकमन्वेष्टव्यम् ... आगमसिद्धत्वादस्यार्थस्य ŚrutaPra. iA.151.29 (*on* i.1.1); सत्यपि पित्रादावुपनेतरि होमगायत्र्युपदेशादिकर्ता अन्य एवाचार्योऽन्वेष्टव्य: VīraMi. (Saṁskāra.) 407.13; कार्यादीनां त्वारोपेण निष्पत्तिरन्वेष्टव्या RasGaṅ. 557.9; तस्मादुदाहरणान्तरमन्वेष्टव्यम् MayūMāli. 624.1 (*on* ix.3.4); **3A** to be followed, i.e. to be resorted to संभूय च मदर्थोऽयमन्वेष्टव्यो नरेश्वरा: Rāmā. vii.44.20 (Bombay Ed.) (Tilaka अनुसरणीय:); **3B** to be pursued न च कदाचिदपि चकित: पलायमानो मानिना रिपुरन्वेष्टव्य: HammīMaMa. 1.27 (1); भीरु: पलायमानोऽपि नान्वेष्टव्यो बलीयसा। कदाचिच्छूरतामेति मरणे कृतनिश्चय: SūktiRa. 156.32; ŚārṅgaPa. 1936; Subhāṣi. 2654; **4** to be obtained य ऋजुनोपायेनान्वेष्टव्यानर्थानृजुनोपायेनान्विच्छति स उच्यते पार्थक इति MahāBh. ii.387.16 (*on* v.2.75); यो मृदुनोपायेनान्वेष्टव्यानर्थान् रभसेनान्विच्छति स उच्यत आय:शूलिक: MahāBh. ii.388.1 (*on* v.2.76); Prasā. i.882.3; **5A** to be asked or inquired वाक्पारुष्यादिना नीचो य: सन्तमभिलङ्घयेत्। स एव ताडयंस्तस्य नान्वेष्टव्यो महीभुजा BṛhaspaSm. 173.5; DaṇḍaVi. 216.16; **5B** to be examined or investigated न च जीवात्मन इष्टसंपत्तये पत्यादय: प्रिया भवन्तीत्युक्ते सति तस्य जीवस्य स्वरूपमन्वेष्टव्यं भवति BrahmSūBh. (Rā.) 375.18 (*on* i.4.19); **6** to be known or realised (योषिताम्) तस्मादासां स्मृतित एव शौचमन्वेष्टव्यम् KāmSū. 172.14 (2.9); JayaMā. 172.23 (*on* 2.9); वैद्यकाद्या वर्णविशेषा अन्वेष्टव्या: कथं भवन्तीति ChāndoUBh. 501.3 (*on* viii. 6.1); यस्मिंश्च काले कर्म कर्तव्यं यावन्तं च कालं तत्स्मृत्यन्तरादन्वेष्टव्यम् ManuBh. i.310.28 (*on* 3.237); अवशिष्टं मयूखेऽन्ने(?न्वे)ष्टव्यम् Upask. 154.19 (*on* iii.1.14); तुलाकालपरिमाणादिकं विस्तारभयान्न लिख्यते। महादानेऽन्वेष्टव्यम् VīraMi. 544.3 (*on* 2.100-102); तत्र ध्येयम् ... परं ब्रह्म तस्मिन्नन्वेष्टव्यमपहतपाप्मत्वादिगुणजातम् GoviBh. 46.13 (*on* i.3.14); **7** word or expression *anveṣṭavya* यदा 'तस्मिन् यदन्त:' इति निर्देशोऽर्थान्तरपर: तदा अन्वेष्टव्यशब्दस्य गुणविषयत्वाभावेन दहराकाशस्य भूताकाशत्वं स्यात् ŚrutaPra. ii.31.14 (*on* i.3.13)

**अन्वेष्टव्यता** (anveṣṭavya-tā) *f.* the state of being what is to be sought, i.e. aimed at आकाशशब्देन जगदुपादानकारणं प्रतिपाद्य तदन्तर्वर्तिन: कस्यचित्तत्त्वविशेषस्यान्वेष्टव्यता प्रतिपाद्यते VedārthSaṁ. 136.12; (ब्रह्मण:) अन्वेष्टव्यतोपयुक्तत्वाच्च निरतिशयभोग्यतापरत्वं युक्तम् ŚrutaPra. ii.36.10 (*on* i.3.13); [Inst.] by way of being sought, i.e. aimed at अन्वेष्टव्यतया अभिहितस्य दहराकाशस्य ... इत्येवमाक्षेपपूर्वकं प्रतिसमाधानवचनं भवति BrahmSūBh. (Śaṅ.) 166.3 (*on* i.3.14); जीवात्मन उपक्रमे त्वन्वेष्टव्यतया प्रतिपादनात् BrahmSūBh. (Rā.) 375.10 (*on* i.4.19); उपक्रमे चान्वेष्टव्यतया प्रतिज्ञात आकाश आत्मा VedāntDī. 49.11 (*on* i.3.13); उपक्रमे 'तस्मिन् यदन्तस्तदन्वेष्टव्यम्' इत्यन्वेष्टव्यतया प्राधान्येनावगततत्वात् ŚrutaPra. ii.33.11 (*on* i.3.13)

**अन्वेष्टव्यतापरत्व** (anveṣṭavyatāpara-tva) *n.* the state of being meant to be what is to be sought, i.e. aimed at यदन्तरित्यादेर्दहराकाशस्यान्वेष्टव्यतापरत्वमवसीयते UpaParā. 47.24.

**अन्वेष्टव्यताप्रतीति** (anveṣṭavyatā-pratīti) *f.* knowledge of the state of being what is to be sought, i.e. aimed at आकाशान्तर्वर्तिनोऽन्यस्यान्वेष्टव्यताप्रतीतेश्च VedāntDī. 49.1 (*on* i.3.13)

**अन्वेष्टव्यत्व** (anveṣṭavya-tva) *n.* **A** the state of being what is to be sought, i.e. aimed at न चात्र दहरस्याकाशस्यान्वेष्टव्यत्वं विजिज्ञासितव्यं च श्रूयते BrahmSūBh. (Śaṅ.) 165.17 (*on* i.3.14); 168.8 (*on* i.3.14); वाक्यशेषे दरा(?दहरा)काशस्य ... अन्वेष्टव्यत्वं परब्रह्मरूपता च UpaParā. 43.31; [Inst.] by way of being what is to be sought, i.e. aimed at यद्याकाशो नान्वेष्टव्यत्वेनोक्त: स्यात् BrahmSūBh. (Śaṅ.) 168.9 (*on* i.3.14); अपहतपाप्मत्वादिगुणकस्यात्मन: प्रकरणादावन्वेष्टव्यत्वेन विजिज्ञासितव्यत्वेन च प्रतिज्ञानात् BrahmŚūBh. (Śaṅ.) 217.3 (*on* i.3.40); **B** the state of being what is to be sought पत्यादीनामात्मन: प्रियत्वे तेषामन्वेष्टव्यत्वं स्यात् ŚrutaPra. ii.145.31 (*on* i.4.19)

**अन्वेष्टव्यत्वनिश्चय** (anveṣṭavyatva-niścaya) *m.* ascertainment of the state of being what is to be sought, i.e. aimed at सोऽन्वेष्टव्य: इत्यादिष्वात्मनोऽन्वेष्टव्यत्वनिश्चयात् ŚrutaPra. ii.33.11 (*on* i.3.13)

**अन्वेष्टव्यत्वप्रतीति** (anveṣṭavyatva-pratīti) *f.* knowledge of the state of being what is to be sought, i.e. aimed at उपक्रमे ... आकाशान्तर्वर्तिनस्ततोऽन्यस्यान्वेष्टव्यत्वप्रतीतावपि ... तस्यैवान्वेष्टव्यत्वम् UpaParā. 43.29.